श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ५३

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ५३

### *धेनुकासुरवधवर्णनम्*

अतीत्य बाल्यं जगतां पते त्वमुपेत्य पौगण्डवयो मनोज्ञम्।
उपेक्ष्य वत्सावनमुत्सवेन प्रावर्तथा गोगणपालनायाम्॥ १ ॥

उपक्रमस्यानुगुणैव सेयं मरुत्पुराधीश तव प्रवृत्तिः।
गोत्रापरित्राणकृतेऽवतीर्णस्तदेव देवाऽऽरभथास्तदा यत्॥ २ ॥

कदापि रामेण समं वनान्ते वनश्रियं वीक्ष्य चरन् सुखेन।
श्रीदामनाम्नः स्वसखस्य वाचा मोदादगा धेनुककाननं त्वम्॥ ३ ॥

उत्ताळताळीनिवहे त्वदुक्त्या बलेन धूतेऽथ बलेन दोर्भ्याम्।
मृदुः खरश्चाभ्यपतत्पुरस्तात् फलोत्करो धेनुकदानवोऽपि॥ ४ ॥

समुद्यतो धैनुकपालनेऽहं कथं वधं धैनुकमद्य कुर्वे।
इतीव मत्वा ध्रुवमग्रजेन सुरौघयोद्धारमजीघतस्त्वम्॥ ५ ॥

तदीयभृत्यानपि जम्बुकत्वेनोपागतानग्रजसंयुतस्त्वम्।
जम्बूफलानीव तदा निरास्थस्तालेषु खेलन् भगवन् निरास्थः॥ ६ ॥

विनिघ्नति त्वय्यथ जम्बुकौघं सनामकत्वाद्वरुणस्तदानीम्।
भयाकुलो जम्बुकनामधेयं श्रुतिप्रसिद्धं व्यधितेति मन्ये॥ ७ ॥

तवावतारस्य फलं मुरारे सञ्जातमद्येति सुरैर्नुतस्त्वम्।
सत्यं फलं जातमिहेति हासी बालैः समं तालफलान्यभुङ्क्थाः॥ ८ ॥

मधुद्रवस्रुन्ति बृहन्ति तानि फलानि मेदोभरभृन्ति भुक्त्वा।
तृप्तैश्च दृप्तैर्भवनं फलौघं वहद्भिरागाः खलु बालकैस्त्वम्॥ ९ ॥

हतो हतो धेनुक इत्युपेत्य फलान्यदद्भिर्मधुराणि लोकैः।
जयेति जीवेति नुतो विभो त्वं मरुत्पुराधीश्वर पाहि रोगात्॥ १० ॥

**********